चारों वर्णोंकी रचना करनेमें भगवान् के अकर्तापन का कथन ।

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥१३॥

चातुर्वर्ण्यम्, मया, सृष्टम्, गुणकर्मविभागशः,
तस्य, कर्तारम्, अपि, माम्, विद्धि, अकर्तारम्, अव्ययम् ॥१३॥

तथा हे अर्जुन–

गुणकर्मविभागशः	= गुण और कर्मोंके विभागसे	कर्तारम्	= कर्ताको
चातुर्वर्ण्यम्	= ब्राह्मण क्षत्रिय वैश्य और शूद्र	अपि	= भी
मया	= मेरे द्वारा	माम्	= मुझ
सृष्टम्	= रचे गये हैं	अव्ययम्	= अविनाशी परमेश्वरको (तूं)
तस्य	= उनके	अकर्तारम्	= अकर्ता (ही)
		विद्धि	= जान

श्रीभगवान्‌के कर्मोंकी दिव्यता और उनके जाननेका फल।

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥

न, माम्, कर्माणि, लिम्पन्ति, न, मे, कर्मफले, स्पृहा, इति, माम्, यः, अभिजानाति, कर्मभिः, न, सः, बध्यते ॥१४॥

क्योंकि—

कर्मफले	= कर्मोंके फलमें	**इति**	= इस प्रकार
मे	= मेरी	**यः**	= जो
स्पृहा	= स्पृहा	**माम्**	= मेरेको
न	= नहीं है (इसलिये)	**अभिजानाति**	= तत्त्वसे जानता है
माम्	= मेरेको	**सः**	= वह (भी)
कर्माणि	= कर्म	**कर्मभिः**	= कर्मोंसे
न लिम्पन्ति	= लिपायमान नहीं करते	**न**	= नहीं
		बध्यते	= बंधता है

पूर्वज मुमुक्षु पुरुषोंकी भांति निष्काम कर्म करनेके लिये आज्ञा।

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥१५॥

एवम्, ज्ञात्वा, कृतम्, कर्म, पूर्वैः, अपि, मुमुक्षुभिः, कुरु, कर्म, एव, तस्मात्, त्वम्, पूर्वैः, पूर्वतरम्, कृतम् ॥१५॥

तथा—

पूर्वैः	= पहिले होनेवाले	**ज्ञात्वा**	= जानकर (ही)
मुमुक्षुभिः	= मुमुक्षु पुरुषों-द्वारा	**कर्म**	= कर्म
		कृतम्	= किया गया है
अपि	= भी	**तस्मात्**	= इससे
एवम्	= इस प्रकार	**त्वम्**	= तूं (भी)

पूर्वैः = पूर्वजोंद्वारा
पूर्वतरम् कृतम् } = सदासे किये हुए
कर्म = कर्मको
एव = ही
कुरु = कर

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥

कर्म और अकर्मको तत्त्वसे जाननेका फल ।

किम्, कर्म, किम्, अकर्म, इति, कवयः, अपि, अत्र, मोहिताः,
तत्, ते, कर्म, प्रवक्ष्यामि, यत्, ज्ञात्वा, मोक्ष्यसे, अशुभात् ॥१६॥

परन्तु—

कर्म = कर्म
किम् = क्या है (और)
अकर्म = अकर्म
किम् = क्या है
इति = ऐसे
अत्र = इस विषयमें
कवयः = बुद्धिमान् पुरुष
अपि = भी
मोहिताः = मोहित हैं (इसलिये मैं)
तत् = वह
कर्म = { कर्म अर्थात् कर्मोंका तत्त्व
ते = तेरे लिये
प्रवक्ष्यामि = { अच्छी प्रकार कहूंगा (कि)
यत् = जिसको
ज्ञात्वा = जानकर (तूं)
अशुभात् = { अशुभ अर्थात् संसारबन्धनसे
मोक्ष्यसे = छूट जायगा

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥

कर्म विकर्म और अकर्मके स्वरूपको जानने के लिये प्रेरणा ।

कर्मणः, हि, अपि, बोद्धव्यम्, बोद्धव्यम्, च, विकर्मणः,
अकर्मणः, च, बोद्धव्यम्, गहना, कर्मणः, गतिः ॥१७॥

कर्मणः = कर्मका स्वरूप
अपि = भी

बोद्धव्यम् = जानना चाहिये
च = और
अकर्मणः = { अकर्मका स्वरूप (भी)
बोद्धव्यम् = जानना चाहिये
च = तथा
विकर्मणः = { निषिद्ध कर्मका स्वरूप (भी)
बोद्धव्यम् = जानना चाहिये
हि = क्योंकि
कर्मणः = कर्मकी
गतिः = गति
गहना = गहन है

कर्ममें अकर्म और अकर्म में कर्मको तत्त्वसे जाननेका फल।

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥

कर्मणि, अकर्म, यः, पश्येत्, अकर्मणि, च, कर्म, यः, सः, बुद्धिमान्, मनुष्येषु, सः, युक्तः, कृत्स्नकर्मकृत् ॥१८॥

यः = जो पुरुष
कर्मणि = { कर्ममें अर्थात् अहंकाररहित की हुई संपूर्ण चेष्टाओंमें
अकर्म = { अकर्म अर्थात् वास्तवमें उनका न होनापना
पश्येत् = देखे
च = और
यः = जो पुरुष
अकर्मणि = { अकर्ममें अर्थात् अज्ञानी पुरुषद्वारा किये हुए संपूर्ण क्रियाओंके त्यागमें
(भी)
कर्म = { कर्मको अर्थात् त्यागरूप क्रियाको (देखे)
सः = वह पुरुष
मनुष्येषु = मनुष्योंमें
बुद्धिमान् = बुद्धिमान् है
(और)
सः = वह
युक्तः = योगी
कृत्स्न-कर्मकृत् = { संपूर्ण कर्मोंका करनेवाला है

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥१९॥

कामना और संकल्प रहित आचरण वाले ज्ञानीकी प्रशंसा।

यस्य, सर्वे, समारम्भाः, कामसंकल्पवर्जिताः, ज्ञानाग्निदग्धकर्माणम्, तम्, आहुः, पण्डितम्, बुधाः ॥१९॥

और हे अर्जुन—

यस्य	= जिसके	ज्ञानाग्नि-दग्ध-कर्माणम्	= ज्ञानरूप अग्नि-द्वारा भस्म हुए कर्मोंवाले पुरुषको
सर्वे	= संपूर्ण	बुधाः	= ज्ञानीजन (भी)
समारम्भाः	= कार्य	पण्डितम्	= पण्डित
कामसंकल्प-वर्जिताः	= कामना और संकल्पसे रहित हैं (ऐसे)	आहुः	= कहते हैं
तम्	= उस		

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥

फलासक्तिको त्यागकर कर्म करनेवाले की प्रशंसा।

त्यक्त्वा, कर्मफलासङ्गम्, नित्यतृप्तः, निराश्रयः, कर्मणि, अभिप्रवृत्तः, अपि, न, एव, किंचित्, करोति, सः॥२०॥

और जो पुरुष—

निराश्रयः	= सांसारिक आश्रयसे रहित	कर्म-फलासङ्गम्	= कर्मोंके फल और सङ्ग अर्थात् कर्तृत्व अभिमानको
नित्य-तृप्तः	= सदा परमानन्द परमात्मामें तृप्त है	त्यक्त्वा	= त्यागकर
सः	= वह	कर्मणि	= कर्ममें

अभिप्रवृत्तः	= अच्छी प्रकार वर्तता हुआ	एव	= भी
अपि	= भी	न	= नहीं
किंचित्	= कुछ	करोति	= करता है

केवल शरीर-सम्बन्धी कर्म करते हुए संन्यासीको पाप न लगनेका कथन।

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्॥२१॥

निराशीः, यतचित्तात्मा, त्यक्तसर्वपरिग्रहः,
शारीरम्, केवलम्, कर्म, कुर्वन्, न, आप्नोति, किल्बिषम्॥२१॥

और—

यत-चित्तात्मा	= जीत लिया है अन्तःकरण और शरीर जिसने (तथा)	केवलम्	= केवल
		शारीरम्	= शरीरसम्बन्धी
		कर्म	= कर्मको
त्यक्तसर्व-परिग्रहः	= त्याग दी है संपूर्ण भोगोंकी सामग्री जिसने (ऐसा)	कुर्वन्	= करता हुआ (भी)
		किल्बिषम्	= पापको
		न	= नहीं
निराशीः	= आशारहित पुरुष	आप्नोति	= प्राप्त होता है

निष्कामकर्मयोगके साधक का लक्षण और कर्मोंसे न बंधनेका कथन।

यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते॥२२॥

यदृच्छालाभसंतुष्टः, द्वन्द्वातीतः, विमत्सरः,
समः, सिद्धौ, असिद्धौ, च, कृत्वा, अपि, न, निबध्यते ॥२२॥

और—

यदृच्छालाभसंतुष्टः	= अपने आप जो कुछ आ प्राप्त हो उसमें ही संतुष्ट रहनेवाला (और)	सिद्धौ	= सिद्धि
		च	= और
		असिद्धौ	= असिद्धिमें
		समः	= समत्वभाववाला पुरुष
द्वन्द्वातीतः	= हर्षशोकादि द्वन्द्वोंसे अतीत हुआ (तथा)		(कर्मोंको)
		कृत्वा	= करके
		अपि	= भी
विमत्सरः	= मत्सरता अर्थात् ईर्षासे रहित	न	= नहीं
		निबध्यते	= बंधता है

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥२३॥

यज्ञार्थ कर्म करनेवाले ज्ञानी के संपूर्ण कर्म नष्ट होनेका कथन ।

गतसङ्गस्य, मुक्तस्य, ज्ञानावस्थितचेतसः,
यज्ञाय, आचरतः, कर्म, समग्रम्, प्रविलीयते ॥२३॥

क्योंकि—

गतसङ्गस्य	= आसक्तिसे रहित	आचरतः	= आचरण करते हुए
ज्ञानावस्थितचेतसः	= ज्ञानमें स्थित हुए चित्तवाले	मुक्तस्य	= मुक्त पुरुषके
		समग्रम्	= संपूर्ण
		कर्म	= कर्म
यज्ञाय	= यज्ञके लिये	प्रविलीयते	= नष्ट हो जाते हैं

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥२४॥

ब्रह्मयज्ञका कथन ।

ब्रह्म, अर्पणम्, ब्रह्म, हविः, ब्रह्माग्नौ, ब्रह्मणा, हुतम्,
ब्रह्म, एव, तेन, गन्तव्यम्, ब्रह्मकर्मसमाधिना ॥२४॥

उन यज्ञके लिये आचरण करनेवाले पुरुषोंमेंसे कोई तो इस भावसे यज्ञ करते हैं कि—

अर्पणम्	= अर्पण अर्थात् स्रुवादिक (भी)	हुतम्	= हवन किया गया है (वह भी ब्रह्म ही है इसलिये)
ब्रह्म	= ब्रह्म है (और)	ब्रह्मकर्मसमाधिना	= ब्रह्मरूप कर्ममें समाधिस्थ हुए
हविः	= हवि अर्थात् हवन करने योग्य द्रव्य (भी)	तेन	= उस पुरुषद्वारा (जो)
ब्रह्म	= ब्रह्म है (और)	गन्तव्यम्	= प्राप्त होने योग्य है (वह भी)
ब्रह्माग्नौ	= ब्रह्मरूप अग्निमें	ब्रह्म	= ब्रह्म
ब्रह्मणा	= ब्रह्मरूप कर्ताके द्वारा (जो)	एव	= ही है

देवयज्ञ और ज्ञानयज्ञ का कथन।

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥

दैवम्, एव, अपरे, यज्ञम्, योगिनः, पर्युपासते,
ब्रह्माग्नौ, अपरे, यज्ञम्, यज्ञेन, एव, उपजुह्वति ॥२५॥

और—

अपरे	= दूसरे	यज्ञम्	= यज्ञको
योगिनः	= योगीजन	एव	= ही
दैवम्	= देवताओंके पूजनरूप	पर्युपासते	= अच्छी प्रकार उपासते हैं अर्थात् करते हैं

(और)	यज्ञेन = यज्ञके द्वारा
अपरे = दूसरे (ज्ञानीजन)	एव = ही
ब्रह्माग्नौ = परब्रह्म परमात्मा-रूप अग्निमें	यज्ञम् = यज्ञको
	उपजुह्वति = हवन*करते हैं

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति॥२६॥

इन्द्रियसंयम-रूप यज्ञ और विषयहवनरूप यज्ञका कथन।

श्रोत्रादीनि, इन्द्रियाणि, अन्ये, संयमाग्निषु, जुह्वति, शब्दादीन्, विषयान्, अन्ये, इन्द्रियाग्निषु, जुह्वति ॥२६॥

और—

अन्ये = अन्य योगीजन	अन्ये = और दूसरे योगीलोग
श्रोत्रादीनि = श्रोत्रादिक	शब्दादीन् = शब्दादिक
इन्द्रियाणि = सब इन्द्रियोंको	विषयान् = विषयोंको
संयमाग्निषु = संयम अर्थात् स्वाधीनतारूप अग्निमें	इन्द्रियाग्निषु = इन्द्रियरूप अग्निमें
जुह्वति = हवन करते हैं अर्थात् इन्द्रियोंको विषयोंसे रोककर अपने वशमें कर लेते हैं	जुह्वति = हवन करते हैं अर्थात् रागद्वेष-रहित इन्द्रियों-द्वारा विषयोंको ग्रहण करते हुए भी भस्मरूप करते हैं

* परब्रह्म परमात्मामें ज्ञानद्वारा एकीभावसे स्थित होना ही ब्रह्मरूप अग्निमें यज्ञके द्वारा यज्ञको हवन करना है।

अन्तःकरण-संयमरूप यज्ञ।

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥

सर्वाणि, इन्द्रियकर्माणि, प्राणकर्माणि, च, अपरे,
आत्मसंयमयोगाग्नौ, जुह्वति, ज्ञानदीपिते ॥ २७ ॥

और-

अपरे	=दूसरे योगीजन	**ज्ञानदीपिते**	=ज्ञानसे प्रकाशित हुई
सर्वाणि	=संपूर्ण	**आत्मसंयमयोगाग्नौ**	=परमात्मामें स्थितिरूप योगाग्निमें
इन्द्रियकर्माणि	=इन्द्रियोंकी चेष्टाओंको	**जुह्वति**	=हवन करते हैं*
च	=तथा		
प्राणकर्माणि	=प्राणोंके व्यापारको		

द्रव्ययज्ञ, तपयज्ञ, योगयज्ञ और स्वाध्याय रूप ज्ञानयज्ञकाकथन

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥

द्रव्ययज्ञाः, तपोयज्ञाः, योगयज्ञाः, तथा, अपरे,
स्वाध्यायज्ञानयज्ञाः, च, यतयः, संशितव्रताः ॥ २८ ॥

और-

अपरे	=दूसरे (कई पुरुष)	**तथा**	=वैसे ही (कई पुरुष)
द्रव्ययज्ञाः	=ईश्वर अर्पण बुद्धिसे लोकसेवामें द्रव्य लगानेवाले हैं	**तपोयज्ञाः**	=स्वधर्मपालनरूप तपयज्ञको करनेवाले हैं (और कई)

---

* सच्चिदानन्दघन परमात्माके सिवाय अन्य किसीका भी न चिन्तन करना ही उन सबका हवन करना है।

योगयज्ञाः = अष्टांग योगरूप यज्ञको करनेवाले हैं
च = और (दूसरे)
संशितव्रताः = अहिंसादि तीक्ष्ण व्रतोंसे युक्त
यतयः = यत्नशील पुरुष
स्वाध्यायज्ञानयज्ञाः = भगवान्‌के नाम-का जप तथा भगवत्प्राप्ति-विषयक शास्त्रों-का अध्ययनरूप ज्ञानयज्ञके करनेवाले हैं

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥

यज्ञरूपसे त्रिविध प्राणायाम का कथन ।

अपाने, जुह्वति, प्राणम्, प्राणे, अपानम्, तथा, अपरे, प्राणापानगती, रुद्ध्वा, प्राणायामपरायणाः ॥ २९ ॥

और दूसरे योगीजन-

अपाने = अपानवायुमें
प्राणम् = प्राणवायुको
जुह्वति = हवन करते हैं
तथा = वैसे ही (अन्य योगीजन)
प्राणे = प्राणवायुमें
अपानम् = अपानवायुको
(जुह्वति) = हवन करते हैं (तथा)
अपरे = अन्य योगीजन
प्राणापानगती = प्राण और अपानकी गतिको
रुद्ध्वा = रोककर
प्राणायामपरायणाः = प्राणायामके परायण (होते हैं)

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥३०॥

यज्ञरूपसे चतुर्थ प्राणायाम का कथन और सब प्रकारके यज्ञ करनेवालों की प्रशंसा ।

अपरे, नियताहाराः, प्राणान्, प्राणेषु, जुह्वति, सर्वे, अपि, एते, यज्ञविदः, यज्ञक्षपितकल्मषाः ॥ ३० ॥

और–

अपरे =दूसरे

नियताहाराः =नियमित आहार*करनेवाले योगीजन

प्राणान् =प्राणोंको

प्राणेषु =प्राणोंमें ही

जुह्वति =हवन करते हैं (इस प्रकार)

यज्ञक्षपितकल्मषाः =यज्ञोंद्वारा नाश हो गया है पाप जिनका (ऐसे)

एते =यह

सर्वे =सब

अपि =ही (पुरुष)

यज्ञविदः =यज्ञोंको जाननेवाले हैं

यज्ञ करनेवालों को भगवत्प्राप्ति और न करनेवालोंकी निन्दा।

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥

यज्ञशिष्टामृतभुजः, यान्ति, ब्रह्म, सनातनम्, न, अयम्, लोकः, अस्ति, अयज्ञस्य, कुतः, अन्यः, कुरुसत्तम ३१

और–

कुरुसत्तम =हे कुरुश्रेष्ठ अर्जुन

यज्ञशिष्टामृतभुजः =यज्ञोंके परिणामरूप ज्ञानामृतको भोगनेवाले योगीजन

सनातनम् =सनातन

ब्रह्म =परब्रह्म परमात्माको

यान्ति =प्राप्त होते हैं

(और)

अयज्ञस्य=यज्ञरहित पुरुषको

अयम् =यह

लोकः =मनुष्यलोक (भी सुखदायक)

न =नहीं

अस्ति =है (फिर)

अन्यः =परलोक

कुतः =कैसे (सुखदायक होगा)

* गीता अध्याय ६ श्लोक १७ में देखना चाहिये।

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥

यज्ञोंको तत्त्वसे जाननेका फल ।

एवम्, बहुविधाः, यज्ञाः, विततः, ब्रह्मणः, मुखे,
कर्मजान्, विद्धि, तान्, सर्वान्, एवम्, ज्ञात्वा, विमोक्ष्यसे ।३२।

एवम् = ऐसे
बहुविधाः = बहुत प्रकारके
यज्ञाः = यज्ञ
ब्रह्मणः = वेदकी
मुखे = वाणीमें
वितताः = विस्तार किये गये हैं
तान् = उन
सर्वान् = सबको
कर्मजान् = शरीर, मन और इन्द्रियोंकी क्रियाद्वारा ही उत्पन्न होनेवाले
विद्धि = जान
एवम् = इस प्रकार (तत्त्वसे)
ज्ञात्वा = जानकर (निष्कामकर्मयोगद्वारा)
विमोक्ष्यसे = संसारबन्धनसे मुक्त हो जायगा

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३॥

ज्ञानयज्ञकी प्रशंसा ।

श्रेयान्, द्रव्यमयात्, यज्ञात्, ज्ञानयज्ञः, परंतप,
सर्वम्, कर्म, अखिलम्, पार्थ, ज्ञाने, परिसमाप्यते ॥ ३३ ॥

और—

परंतप = हे अर्जुन
द्रव्यमयात् = सांसारिक वस्तुओंसे सिद्ध होनेवाले
यज्ञात् = यज्ञसे
ज्ञानयज्ञः = ज्ञानरूप यज्ञ (सब प्रकार)
श्रेयान् = श्रेष्ठ है

(क्योंकि)		ज्ञाने	= ज्ञानमें
पार्थ	= हे पार्थ	परिसमाप्यते	= शेष होते हैं अर्थात् ज्ञान उनकी पराकाष्ठा है
सर्वम्	= संपूर्ण		
अखिलम्	= यावन्मात्र		
कर्म	= कर्म		

ज्ञानके लिये ज्ञानवानों की शरण जानेका कथन ।

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥३४॥

तत्, विद्धि, प्रणिपातेन, परिप्रश्नेन, सेवया,
उपदेक्ष्यन्ति, ते, ज्ञानम्, ज्ञानिनः, तत्त्वदर्शिनः ॥३४॥

इसलिये तत्त्वको जाननेवाले ज्ञानी पुरुषोंसे—

प्रणिपातेन	= भली प्रकार दण्डवत् प्रणाम (तथा)	ते	= वे
सेवया	= सेवा (और)	तत्त्वदर्शिनः	= मर्मको जाननेवाले
परिप्रश्नेन	= निष्कपटभावसे किये हुए प्रश्नद्वारा	ज्ञानिनः	= ज्ञानीजन (तुझे उस)
तत्	= उस ज्ञानको	ज्ञानम्	= ज्ञानका
विद्धि	= जान	उपदेक्ष्यन्ति	= उपदेश करेंगे

ज्ञानका फल।

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥३५॥

यत्, ज्ञात्वा, न, पुनः, मोहम्, एवम्, यास्यसि, पाण्डव,
येन, भूतानि, अशेषेण, द्रक्ष्यसि, आत्मनि, अथो, मयि ॥३५॥

कि—

यत्	= जिसको	ज्ञात्वा	= जानकर (तू)

पुनः =फिर
एवम् =इस प्रकार
मोहम् =मोहको
न =नहीं
यास्यसि =प्राप्त होगा (और)
पाण्डव =हे अर्जुन
येन =जिस ज्ञानके द्वारा (सर्वव्यापी अनन्त चेतनरूप हुआ)
आत्मनि =अपने अन्तर्गत समष्टि बुद्धिके आधार
अशेषेण =संपूर्ण
भूतानि =भूतोंको
द्रक्ष्यसि =देखेगा * (और)
अथो =उसके उपरान्त
मयि =मेरेमें अर्थात् सच्चिदानन्द-स्वरूपमें एकीभाव हुआ सच्चिदानन्द-मय ही देखेगा †

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥३६॥

ज्ञानरूप नौका द्वारा अतिशय पापी का भी उद्धार ।

अपि, चेत्, असि, पापेभ्यः, सर्वेभ्यः, पापकृत्तमः,
सर्वम्, ज्ञानप्लवेन, एव, वृजिनम्, संतरिष्यसि ॥३६॥

और-

चेत् =यदि (तू)
सर्वेभ्यः =सब
पापेभ्यः =पापियोंसे
अपि =भी
पापकृत्तमः =अधिक पाप करनेवाला

* गीता अध्याय ६ श्लोक २९ में देखना चाहिये ।

† गीता अध्याय ६ श्लोक ३० में देखना चाहिये ।

असि	= है (तो भी)	सर्वम्	= संपूर्ण
ज्ञानप्लवेन	= ज्ञानरूप नौकाद्वारा	वृजिनम्	= पापोंको
एव	= निःसन्देह	संतरिष्यसि	= अच्छी प्रकार तर जायगा

अग्निके दृष्टान्त-से ज्ञान की महिमा ।

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥३७॥

यथा, एधांसि, समिद्धः, अग्निः, भस्मसात्, कुरुते, अर्जुन, ज्ञानाग्निः, सर्वकर्माणि, भस्मसात्, कुरुते, तथा ॥३७॥

क्योंकि—

अर्जुन	= हे अर्जुन	कुरुते	= कर देता है
यथा	= जैसे	तथा	= वैसे ही
समिद्धः	= प्रज्वलित	ज्ञानाग्निः	= ज्ञानरूप अग्नि
अग्निः	= अग्नि	सर्वकर्माणि	= संपूर्ण कर्मोंको
एधांसि	= इन्धनको	भस्मसात्	= भस्ममयं
भस्मसात्	= भस्ममय	कुरुते	= कर देता है

ज्ञानकी अतिशय पवित्रता और पुरुषार्थसे ज्ञान प्राप्तिका कथन ।

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥

न, हि, ज्ञानेन, सदृशम्, पवित्रम्, इह, विद्यते, तत्, स्वयम्, योगसंसिद्धः, कालेन, आत्मनि, विन्दति ॥३८॥

इसलिये—

इह	= इस संसारमें	न	= नहीं
ज्ञानेन	= ज्ञानके	विद्यते	= है
सदृशम्	= समान	तत्	= उस ज्ञानको
पवित्रम्	= पवित्र करनेवाला	कालेन	= कितनेक कालसे
हि	= निःसन्देह (कुछ भी)	स्वयम्	= अपने आप

योग-संसिद्धः	= समत्वबुद्धिरूप योगके द्वारा अच्छी प्रकार शुद्धान्तःकरण हुआ पुरुष	आत्मनि	= आत्मामें
		विन्दति	= अनुभव करता है

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥

ज्ञानके पात्र-का और ज्ञानसे परम शान्तिकी प्राप्तिका कथन।

श्रद्धावान्, लभते, ज्ञानम्, तत्परः, संयतेन्द्रियः, ज्ञानम्, लब्ध्वा, पराम्, शान्तिम्, अचिरेण, अधिगच्छति ।३९।

और हे अर्जुन—

संयतेन्द्रियः	= जितेन्द्रिय	अचिरेण	= तत्क्षण
तत्परः	= तत्पर हुआ		(भगवत्प्राप्तिरूप)
श्रद्धावान्	= श्रद्धावान् पुरुष	पराम्	= परम
ज्ञानम्	= ज्ञानको	शान्तिम्	= शान्तिको
लभते	= प्राप्त होता है	अधि-गच्छति	= प्राप्त हो जाता है
ज्ञानम्	= ज्ञानको		
लब्ध्वा	= प्राप्त होकर		

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥

श्रद्धारहित संशय युक्त अज्ञानीकी दुर्गति का कथन।

अज्ञः, च, अश्रद्दधानः, च, संशयात्मा, विनश्यति, न, अयम्, लोकः, अस्ति, न, परः, न, सुखम्, संशयात्मनः ।४०।

और हे अर्जुन—

अज्ञः	= भगवत्-विषयको न जाननेवाला	अश्रद्दधानः	= श्रद्धारहित
च	= तथा	च	= और
		संशयात्मा	= संशययुक्त पुरुष

विनश्यति = परमार्थसे भ्रष्ट हो जाता है
(उनमें भी)
संशयात्मनः = संशययुक्त पुरुषके लिये तो
: = न
सुखम् = सुख है (और)
न = न

अयम् = यह
लोकः = लोक है
न = न
परः = परलोक
अस्ति = है अर्थात् यह लोक और परलोक दोनों ही उसके लिये भ्रष्ट हो जाते हैं

संशयरहित निष्काम कर्म-योगीके लिये कर्म-बन्धन का निषेध।

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥४१॥

योगसंन्यस्तकर्माणम्, ज्ञानसंछिन्नसंशयम्,
आत्मवन्तम्; न, कर्माणि, निबध्नन्ति, धनंजय ॥ ४१ ॥

और—

धनंजय = हे धनंजय
योग-संन्यस्त-कर्माणम् = समत्वबुद्धिरूप योगद्वारा भगवत्-अर्पण कर दिये हैं संपूर्ण कर्म जिसने
(और)

ज्ञान-संछिन्न-संशयम् = ज्ञानद्वारा नष्ट हो गये हैं सब संशय जिसके ऐसे
आत्मवन्तम् = परमात्म-परायण पुरुषको
कर्माणि = कर्म
न = नहीं
निबध्नन्ति = बांधते हैं

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥४२॥

निष्कामयोगमें स्थित होकर युद्ध करने के लिये आज्ञा ।

तस्मात्; अज्ञानसंभूतम्, हृत्स्थम्, ज्ञानासिना, आत्मनः, छित्त्वा, एनम्, संशयम्, योगम्, आतिष्ठ, उत्तिष्ठ, भारत ॥४२॥

तस्मात् = इससे
भारत = हे भरतवंशी अर्जुन (तू)
योगम् = समत्वबुद्धिरूप योगमें
आतिष्ठ = स्थित हो (और)
अज्ञान-संभूतम् = अज्ञानसे उत्पन्न हुए
हृत्स्थम् = हृदयमें स्थित
एनम् = इस
आत्मनः = अपने
संशयम् = संशयको
ज्ञानासिना = ज्ञानरूप तलवारद्वारा
छित्त्वा = छेदन करके (युद्धके लिये)
उत्तिष्ठ = खड़ा हो

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानकर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः ॥४॥

अथ पञ्चमोऽध्यायः

प्रधान विषय—१ से ६ तक सांख्ययोग और निष्काम कर्मयोगका निर्णय, (७–१२) सांख्ययोगी और निष्काम कर्मयोगीके लक्षण और उनकी महिमा, (१३–२६) ज्ञानयोगका विषय, (२७–२९) भक्ति-सहित ध्यानयोगका वर्णन ।

अर्जुन उवाच

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

संन्यास और निष्कामकर्मयोग में कौन श्रेष्ठ है यह जाननेके लिये अर्जुनका प्रश्न ।

संन्यासम्, कर्मणाम्, कृष्ण, पुनः, योगम्, च, शंससि, यत्, श्रेयः, एतयोः, एकम्, तत्, मे, ब्रूहि, सुनिश्चितम् ॥१॥

उसके उपरान्त अर्जुनने पूछा—

कृष्ण	=हे कृष्ण (आप)	एतयोः	=इन दोनोंमें
कर्मणाम्	=कर्मोंके	एकम्	=एक
संन्यासम्	=संन्यासकी	यत्	=जो
च	=और	सुनिश्चितम्	=निश्चय किया हुआ
पुनः	=फिर	श्रेयः	=कल्याणकारक (होवे)
योगम्	=निष्काम कर्मयोगकी	तत्	=उसको
शंससि	=प्रशंसा करते हो (इसलिये)	मे	=मेरे लिये
		ब्रूहि	=कहिये

श्रीभगवानुवाच

संन्यासकी अपेक्षा निष्काम कर्मयोगकी श्रेष्ठ-ताका कथन।

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥२॥

संन्यासः, कर्मयोगः, च, निःश्रेयसकरौ, उभौ,
तयोः, तु, कर्मसंन्यासात्, कर्मयोगः, विशिष्यते ॥२॥

इस प्रकार अर्जुनके पूछनेपर श्रीकृष्ण महाराज बोले हे अर्जुन—

संन्यासः	=कर्मोंका संन्यास*	कर्मयोगः	=निष्काम कर्मयोग†
च	=और	उभौ	=यह दोनों ही

* अर्थात् मन, इन्द्रियों और शरीरद्वारा होनेवाले संपूर्ण कर्मोंमें कर्तापनका त्याग।

† अर्थात् समत्वबुद्धिसे भगवत्-अर्थ कर्मोंका करना।

निःश्रेयसकरौ = परम कल्याणके करनेवाले हैं
तु = परन्तु
तयोः = उन दोनोंमें भी
कर्म-संन्यासात् = कर्मोंके संन्याससे
कर्मयोगः = निष्काम कर्म-योग (साधनमें सुगम होनेसे)
विशिष्यते = श्रेष्ठ है

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥

निष्काम कर्मयोगीकी प्रशंसा।

ज्ञेयः, सः, नित्यसंन्यासी, यः, न, द्वेष्टि, न, काङ्क्षति,
निर्द्वन्द्वः, हि, महाबाहो, सुखम्, बन्धात्, प्रमुच्यते ॥३॥

इसलिये—

महाबाहो = हे अर्जुन
यः = जो पुरुष
न = न (किसीसे)
द्वेष्टि = द्वेष करता है (और)
न = न (किसीकी)
काङ्क्षति = आकाङ्क्षा करता है
सः = वह (निष्काम कर्मयोगी)
नित्य-संन्यासी = सदा संन्यासी ही
ज्ञेयः = समझने योग्य है
हि = क्योंकि
निर्द्वन्द्वः = रागद्वेषादि द्वन्द्वोंसे रहित हुआ पुरुष
सुखम् = सुखपूर्वक
बन्धात् = संसाररूप बन्धनसे
प्रमुच्यते = मुक्त हो जाता है

साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥४॥

फलमें, सांख्ययोग और निष्कामकर्मयोग की एकता।

सांख्ययोगौ, पृथक्, बालाः, प्रवदन्ति, न, पण्डिताः,
एकम्, अपि, आस्थितः, सम्यक्, उभयोः, विन्दते, फलम् ॥४॥

और हे अर्जुन–

(ऊपर कहे हुए)	पण्डिताः = पण्डितजन
सांख्ययोगौ = संन्यास और निष्काम कर्मयोगको	(क्योंकि दोनोंमेंसे)
	एकम् = एकमें
	अपि = भी
बालाः = मूर्खलोग	सम्यक् = अच्छी प्रकार
पृथक् = अलग अलग	आस्थितः = स्थित हुआ (पुरुष)
(फलवाले)	उभयोः = दोनोंके
प्रवदन्ति = कहते हैं	फलम् = फलरूप परमात्माको
न = न कि	विन्दते = प्राप्त होता है

[„] **यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।**
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥

यत्, सांख्यैः, प्राप्यते, स्थानम्, तत्, योगैः, अपि, गम्यते, एकम्, सांख्यम्, च, योगम्, च, यः, पश्यति, सः, पश्यति ॥५॥

तथा–

सांख्यैः = ज्ञानयोगियोंद्वारा	गम्यते = प्राप्त किया जाता है
यत् = जो	(इसलिये)
स्थानम् = परमधाम	
प्राप्यते = प्राप्त किया जाता है	यः = जो पुरुष
	सांख्यम् = ज्ञानयोग
योगैः = निष्काम कर्मयोगियोंद्वारा	च = और
अपि = भी	योगम् = निष्काम कर्मयोगको
तत् = वही	(फलरूपसे)

एकम् =एक
पश्यति =देखता है
सः =वह
च =ही (यथार्थ)
पश्यति =देखता है

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥६॥

निष्काम कर्म-योगकी अपेक्षा सांख्य योगके साधनमें कठिनताका कथन ।

संन्यासः, तु, महाबाहो, दुःखम्, आप्तुम्, अयोगतः, योगयुक्तः, मुनिः, ब्रह्म, नचिरेण, अधिगच्छति ॥६॥

तु =परन्तु
महाबाहो =हे अर्जुन
अयोगतः = निष्काम कर्मयोगके बिना
संन्यासः = संन्यास अर्थात् मन, इन्द्रियों और शरीरद्वारा होनेवाले संपूर्ण कर्मोंमें कर्तापनका त्याग
आप्तुम् =प्राप्त होना
दुःखम् =कठिन है (और)
मुनिः = भगवत्-स्वरूपको मनन करनेवाला
योगयुक्तः = निष्काम कर्मयोगी
ब्रह्म = परब्रह्म परमात्माको
नचिरेण =शीघ्र ही
अधिगच्छति = प्राप्त हो जाता है

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥

निष्काम कर्मयोगी कर्म करता हुआ भी लिपायमान नहीं होता है इस विषयका कथन ।

योगयुक्तः, विशुद्धात्मा, विजितात्मा, जितेन्द्रियः, सर्वभूतात्मभूतात्मा, कुर्वन्, अपि, न, लिप्यते ॥७॥

तथा—

विजितात्मा = वशमें किया हुआ है शरीर जिसके ऐसा
जितेन्द्रियः = जितेन्द्रिय
(और)
विशुद्धात्मा = विशुद्ध अन्तः-करणवाला
(एवं)
सर्वभूतात्मभूतात्मा = संपूर्ण प्राणियोंके आत्मरूप परमात्मामें एकीभाव हुआ
योगयुक्तः = निष्काम कर्मयोगी
कुर्वन् = कर्म करता हुआ
अपि = भी
न लिप्यते = लिपायमान नहीं होता

सांख्ययोगीका लक्षण।

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥९॥

न, एव, किंचित्, करोमि, इति, युक्तः, मन्येत, तत्त्ववित्, पश्यन्, शृण्वन्, स्पृशन्, जिघ्रन्, अश्नन्, गच्छन्, स्वपन्, श्वसन्, प्रलपन्, विसृजन्, गृह्णन्, उन्मिषन्, निमिषन्, अपि, इन्द्रियाणि, इन्द्रियार्थेषु, वर्तन्ते, इति, धारयन् ॥ ८-९ ॥

और हे अर्जुन—

तत्त्ववित् = तत्त्वको जाननेवाला
युक्तः = सांख्ययोगी तो
पश्यन् = देखता हुआ
शृण्वन् = सुनता हुआ
स्पृशन् = स्पर्श करता हुआ
जिघ्रन् = सूंघता हुआ

अश्नन्	= भोजन करता हुआ	अपि	= भी
गच्छन्	= गमन करता हुआ	इन्द्रियाणि	= सब इन्द्रियां
स्वपन्	= सोता हुआ	इन्द्रियार्थेषु	= अपने अपने अर्थोंमें
श्वसन्	= श्वास लेता हुआ	वर्तन्ते	= बर्त रही हैं
प्रलपन्	= बोलता हुआ	इति	= इस प्रकार
विसृजन्	= त्यागता हुआ	धारयन्	= समझता हुआ
गृह्णन्	= ग्रहण करता हुआ (तथा)	एव	= निःसन्देह
उन्मिषन्	= आंखोंको खोलता (और)	इति	= ऐसे
निमिषन्	= मीचता हुआ	मन्येत	= माने कि (मैं)
		किंचित्	= कुछ भी
		न	= नहीं
		करोमि	= करता हूं

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥१०॥

भगवदर्थं कर्म करनेवाले की निर्लेपतामें पद्म-पत्रका दृष्टान्त।

ब्रह्मणि, आधाय, कर्माणि, सङ्गम्, त्यक्त्वा, करोति, यः,
लिप्यते, न, सः, पापेन, पद्मपत्रम्, इव, अम्भसा ॥ १० ॥

परन्तु हे अर्जुन! देहाभिमानियोंद्वारा यह साधन होना कठिन है और निष्काम कर्मयोग सुगम है क्योंकि—

यः	= जो पुरुष	त्यक्त्वा	= त्यागकर
कर्माणि	= सब कर्मोंको	करोति	= कर्म करता है
ब्रह्मणि	= परमात्मामें	सः	= वह पुरुष
आधाय	= अर्पण करके (और)	अम्भसा	= जलसे
सङ्गम्	= आसक्तिको	पद्मपत्रम्	= कमलके पत्तेकी

इव	=सदृश	न लिप्यते	= लिपायमान नहीं होता
पापेन	=पापसे		

आत्मशुद्धिके लिये योगियोंके कर्माचरण का कथन ।

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥

कायेन, मनसा, बुद्ध्या, केवलैः, इन्द्रियैः, अपि, योगिनः, कर्म, कुर्वन्ति, सङ्गम्, त्यक्त्वा, आत्मशुद्धये ॥ ११ ॥

इसलिये-

योगिनः	= निष्काम कर्मयोगी (ममत्वबुद्धिरहित)	अपि	=भी
		सङ्गम्	=आसक्तिको
केवलैः	=केवल	त्यक्त्वा	=त्यागकर
इन्द्रियैः	=इन्द्रिय	आत्मशुद्धये	= अन्तःकरणकी शुद्धिके लिये
मनसा	=मन		
बुद्ध्या	=बुद्धि (और)	कर्म	=कर्म
कायेन	=शरीरद्वारा	कुर्वन्ति	=करते हैं

कर्मफलके त्यागसे शान्ति और कामनासे बन्धन

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥

युक्तः, कर्मफलम्, त्यक्त्वा, शान्तिम्, आप्नोति, नैष्ठिकीम्, अयुक्तः, कामकारेण, फले, सक्तः, निबध्यते ॥ १२ ॥

इसीसे-

युक्तः	= निष्काम कर्मयोगी	नैष्ठिकीम्	= भगवत्-प्राप्तिरूप
कर्मफलम्	=कर्मोंके फलको	शान्तिम्	=शान्तिको
त्यक्त्वा	= परमेश्वरके अर्पण करके	आप्नोति	=प्राप्त होता है (और)

अयुक्तः = सकामी पुरुष
फले = फलमें
सक्तः = आसक्त हुआ
कामकारेण = कामनाके द्वारा
निबध्यते = बंधता है

इसलिये निष्काम कर्मयोग उत्तम है।

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥१३॥

सांख्ययोगीकी स्थितिका कथन।

सर्वकर्माणि, मनसा, संन्यस्य, आस्ते, सुखम्, वशी,
नवद्वारे, पुरे, देही, न, एव, कुर्वन्, न, कारयन् ॥ १३ ॥

और हे अर्जुन-

वशी = वशमें है अन्तः-करण जिसके ऐसा सांख्ययोगका आचरण करनेवाला
देही = पुरुष (तो)
नवद्वारे = नवद्वारोंवाले
पुरे = शरीररूप घरमें
सर्वकर्माणि = सब कर्मोंको
मनसा = मनसे
संन्यस्य = त्यागकर अर्थात् इन्द्रियां इन्द्रियोंके अर्थोंमें बर्तती हैं ऐसे मानता हुआ
एव = निःसन्देह
न = न
कुर्वन् = करता हुआ (और)
न = न
कारयन् = करवाता हुआ
सुखम् = आनन्दपूर्वक (सच्चिदानन्दघन परमात्माके स्वरूपमें)
आस्ते = स्थित रहता है

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥१४॥

परमात्मामें कर्तापनके अभावका कथन।

न, कर्तृत्वम्, न, कर्माणि, लोकस्य, सृजति, प्रभुः,
न, कर्मफलसंयोगम्, स्वभावः, तु, प्रवर्तते ॥ १४ ॥

और–

प्रभुः	= परमेश्वर (भी)		(वास्तवमें)
लोकस्य	= भूतप्राणियोंके	सृजति	= रचता है
न	= न	तु	= किन्तु
कर्तृत्वम्	= कर्तापनको (और)		(परमात्माके सकाशसे)
न	= न		
कर्माणि	= कर्मोंको (तथा)	स्वभावः	= प्रकृति (ही)
न	= न	प्रवर्तते	= बर्तती है अर्थात् गुण ही गुणोंमें बर्त रहे हैं
कर्मफलसंयोगम्	= कर्मोंके फलके संयोगको		

परमात्मा किसी के पाप-पुण्यको ग्रहण नहीं करता इस विषयमें कथन।

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥१५॥

न, आदत्ते, कस्यचित्, पापम्, न, च, एव, सुकृतम्, विभुः,
अज्ञानेन, आवृतम्, ज्ञानम्, तेन, मुह्यन्ति, जन्तवः ॥ १५ ॥

और–

विभुः	= सर्वव्यापी परमात्मा	सुकृतम्	= शुभकर्मको
		एव	= भी
न	= न	आदत्ते	= ग्रहण करता है
कस्यचित्	= किसीके		(किन्तु)
पापम्	= पापकर्मको	अज्ञानेन	= मायाके द्वारा
च	= और	ज्ञानम्	= ज्ञान
न	= न	आवृतम्	= ढका हुआ है
	(किसीके)	तेन	= इससे

जन्तवः =सब जीव | मुह्यन्ति =मोहित हो रहे हैं

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥१६॥

सूर्यके दृष्टान्तसे ज्ञानकी महिमा ।

ज्ञानेन, तु, तत्, अज्ञानम्, येषाम्, नाशितम्, आत्मनः, तेषाम्, आदित्यवत्, ज्ञानम्, प्रकाशयति, तत्परम् ॥ १६ ॥

तु =परन्तु
येषाम् =जिनका
तत् =वह
आत्मनः =अन्तःकरणका
अज्ञानम् =अज्ञान
ज्ञानेन =आत्मज्ञानद्वारा
नाशितम् =नाश हो गया है
तेषाम् =उनका

(वह)
ज्ञानम् =ज्ञान
आदित्यवत् =सूर्यके सदृश
तत्परम् =उस सच्चिदानन्दघन परमात्माको
प्रकाशयति =प्रकाशता है *

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥१७॥

परमात्मामें तद्रूप हुए महात्माओंको परमगतिकी प्राप्ति ।

तद्बुद्धयः, तदात्मानः, तन्निष्ठाः, तत्परायणाः, गच्छन्ति, अपुनरावृत्तिम्, ज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

और हे अर्जुन—

तद्बुद्धयः =तद्रूप है बुद्धि जिनकी (तथा)
तदात्मानः =तद्रूप है मन जिनका (और)

तन्निष्ठाः =उस सच्चिदानन्दघन परमात्मामें ही है निरन्तर एकीभावसे स्थिति जिनकी ऐसे

* अर्थात् परमात्माके स्वरूपको साक्षात् कराता है ।

तत्परायणाः	= तत्परायण पुरुष	अपुनरावृत्तिम्	= अपुनरावृत्ति-को अर्थात् परमगतिको
ज्ञाननिर्धूत-कल्मषाः	= ज्ञानके द्वारा पापरहित हुए	गच्छन्ति	= प्राप्त होते हैं

ज्ञानियों के समत्व भावका कथन और उनकी महिमा।

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥

विद्याविनयसंपन्ने,- ब्राह्मणे, गवि, हस्तिनि,
शुनि, च, एव, श्वपाके, च, पण्डिताः, समदर्शिनः ॥१८॥

ऐसे वे–

पण्डिताः	= ज्ञानीजन	शुनि	= कुत्ते (और)
विद्याविनय-संपन्ने	= विद्या और विनययुक्त	श्वपाके	= चाण्डालमें
ब्राह्मणे	= ब्राह्मणमें	च	= भी
च	= तथा	सम-दर्शिनः	= समभावसे* देखनेवाले
गवि	= गौ		
हस्तिनि	= हाथी	एव	= ही (होते हैं)

[„] **इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।**
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥

इह, एव, तैः, जितः, सर्गः, येषाम्, साम्ये, स्थितम्, मनः,
निर्दोषम्, हि, समम्, ब्रह्म, तस्मात्, ब्रह्मणि, ते, स्थिताः ॥१९॥

इसलिये–

येषाम्	= जिनका	साम्ये	= समत्वभावमें
मनः	= मन	स्थितम्	= स्थित है

* इसका विस्तार गीता अ० ६ श्लोक ३२ की टिप्पणीमें देखना चाहिये।

तैः = उनके द्वारा
इह = इस जीवित अवस्थामें
एव = ही
सर्गः = संपूर्ण संसार
जितः = जीत लिया गया*
हि = क्योंकि
ब्रह्म = सच्चिदानन्दघन परमात्मा
निर्दोषम् = निर्दोष (और)
समम् = सम है
तस्मात् = इससे
ते = वे
ब्रह्मणि = सच्चिदानन्दघन परमात्मामें ही
स्थिताः = स्थित हैं

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥२०॥

ब्रह्मज्ञानीके लक्षण और उसको अक्षय सुखकी प्राप्ति ।

न, प्रहृष्येत्, प्रियम्, प्राप्य, न, उद्विजेत्, प्राप्य, च, अप्रियम्, स्थिरबुद्धिः, असंमूढः, ब्रह्मवित्, ब्रह्मणि, स्थितः ॥२०॥

और जो पुरुष—

प्रियम् = प्रियको अर्थात् जिसको लोग प्रिय समझते हैं उसको
प्राप्य = प्राप्त होकर
न प्रहृष्येत् = हर्षित नहीं हो
च = और
अप्रियम् = अप्रियको अर्थात् जिसको लोग अप्रिय समझते हैं उसको
प्राप्य = प्राप्त होकर
न उद्विजेत् = उद्वेगवान् न हो (ऐसा)
स्थिरबुद्धिः = स्थिरबुद्धि
असंमूढः = संशयरहित
ब्रह्मवित् = ब्रह्मवेत्ता पुरुष
ब्रह्मणि = सच्चिदानन्दघन परब्रह्म परमात्मामें
स्थितः = एकीभावसे नित्य स्थित है

* अर्थात् वे जीते हुए ही संसारसे मुक्त हैं ।

[„] **बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।**
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥२१॥

बाह्यस्पर्शेषु, असक्तात्मा, विन्दति, आत्मनि, यत्, सुखम्, सः, ब्रह्मयोगयुक्तात्मा, सुखम्, अक्षयम्, अश्नुते ॥२१॥

और–

बाह्यस्पर्शेषु	= बाहरके विषयोंमें अर्थात् सांसारिक भोगोंमें	(तत्)	= उसको
		विन्दति	= प्राप्त होता है (और)
असक्तात्मा	= आसक्तिरहित अन्तःकरणवाला पुरुष	सः	= वह पुरुष
आत्मनि	= अन्तःकरणमें	ब्रह्मयोगयुक्तात्मा	= सच्चिदानन्दघन परब्रह्म परमात्मारूप योगमें एकीभावसे स्थित हुआ
यत्	= जो		
सुखम्	= भगवत्-ध्यानजनित आनन्द है	अक्षयम्	= अक्षय
		सुखम्	= आनन्दको
		अश्नुते	= अनुभव करता है

विषयभोगोंकी निन्दा । **ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।**
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥२२॥

ये, हि, संस्पर्शजाः, भोगाः, दुःखयोनयः, एव, ते, आद्यन्तवन्तः, कौन्तेय, न, तेषु, रमते, बुधः ॥२२॥

और–

ये	= जो	संस्पर्शजाः	= इन्द्रिय तथा विषयोंके संयोगसे उत्पन्न होनेवाले
(यह)			

भोगाः = सब भोग हैं
ते = वे (यद्यपि विषयी पुरुषोंको सुख-रूप भासते हैं तो भी)
हि = निःसन्देह
दुःखयोनयः एव = दुःखके ही हेतु हैं (और)
आद्यन्तवन्तः = आदि अन्त-वाले अर्थात् अनित्य हैं (इसलिये)
कौन्तेय = हे अर्जुन
बुधः = बुद्धिमान् विवेकी पुरुष
तेषु = उनमें
न = नहीं
रमते = रमता

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥२३॥

काम-क्रोधके वेगको जीतनेवाले योगीकी प्रशंसा।

शक्नोति, इह, एव, यः, सोढुम्, प्राक्, शरीरविमोक्षणात्, कामक्रोधोद्भवम्, वेगम्, सः, युक्तः, सः, सुखी, नरः ॥२३॥

यः = जो मनुष्य
शरीर-विमोक्षणात् = शरीरके नाश होनेसे
प्राक् = पहिले
एव = ही
काम-क्रोधोद्भवम् = काम और क्रोधसे उत्पन्न हुए
वेगम् = वेगको
सोढुम् = सहन करनेमें
शक्नोति = समर्थ है अर्थात् काम क्रोधको जिसने सदाके लिये जीत लिया है
सः = वह
नरः = मनुष्य
इह = इस लोकमें
युक्तः = योगी है (और)
सः = वही
सुखी = सुखी है

ज्ञानी महात्माओंके लक्षण और उनको निर्वाण ब्रह्मकी प्राप्ति ।

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥

यः, अन्तःसुखः, अन्तरारामः, तथा, अन्तर्ज्योतिः, एव, यः,
सः, योगी, ब्रह्मनिर्वाणम्, ब्रह्मभूतः, अधिगच्छति ॥२४॥

यः = जो पुरुष
एव = निश्चय करके
अन्तःसुखः = अन्तर आत्मामें ही सुखवाला है (और)
अन्तरारामः = आत्मामें ही आरामवाला है
तथा = तथा
यः = जो
अन्तर्ज्योतिः = आत्मामें ही ज्ञानवाला है (ऐसा)
सः = वह
ब्रह्मभूतः = सच्चिदानन्दघन परब्रह्म परमात्माके साथ एकीभाव हुआ
योगी = सांख्ययोगी
ब्रह्मनिर्वाणम् = शान्त ब्रह्मको
अधिगच्छति = प्राप्त होता है

[„] **लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।**
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥२५॥

लभन्ते, ब्रह्मनिर्वाणम्, ऋषयः, क्षीणकल्मषाः,
छिन्नद्वैधाः, यतात्मानः, सर्वभूतहिते, रताः ॥२५॥

और—

क्षीणकल्मषाः = नाश हो गये हैं सब पाप जिनके (तथा)
छिन्नद्वैधाः = ज्ञान करके निवृत्त हो गया है संशय जिनका

(और)		(ऐसे)	
सर्वभूतहिते रताः	= संपूर्ण भूत प्राणियोंके हितमें है रति जिनकी	ऋषयः	= ब्रह्मवेत्ता पुरुष
यतात्मानः	= एकाग्र हुआ है भगवान्‌के ध्यानमें चित्त जिनका	ब्रह्मनिर्वाणम्	= शान्त परब्रह्मको
		लभन्ते	= प्राप्त होते हैं

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् । [„]
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥२६॥

कामक्रोधवियुक्तानाम्, यतीनाम्, यतचेतसाम्,
अभितः, ब्रह्मनिर्वाणम्, वर्तते, विदितात्मनाम् ॥२६॥

और—

कामक्रोधवियुक्तानाम्	= काम क्रोधसे रहित	यतीनाम्	= ज्ञानी पुरुषोंके लिये
यतचेतसाम्	= जीते हुए चित्तवाले	अभितः	= सब ओरसे
विदितात्मनाम्	= परब्रह्म परमात्माका साक्षात्कार किये हुए	ब्रह्मनिर्वाणम्	= शान्त परब्रह्म परमात्मा ही
		वर्तते	= प्राप्त है

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः । संक्षेपसे फल-
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥ सहित ध्यान-योगका कथन।

स्पर्शान्, कृत्वा, बहिः, बाह्यान्, चक्षुः, च, एव, अन्तरे, भ्रुवोः, प्राणापानौ, समौ, कृत्वा, नासाभ्यन्तरचारिणौ ॥ २७ ॥

और हे अर्जुन–

बाह्यान् = बाहरके
स्पर्शान् = विषय भोगोंको (न चिन्तन करता हुआ)
बहिः = बाहर
एव = ही
कृत्वा = त्यागकर
च = और
चक्षुः = नेत्रोंकी दृष्टिको
भ्रुवोः = भृकुटीके
अन्तरे = बीचमें (स्थित करके (तथा)
नासाभ्यन्तरचारिणौ = नासिकामें विचरनेवाले
प्राणापानौ = प्राण और अपान वायुको
समौ = सम
कृत्वा = करके

[„] यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥

यतेन्द्रियमनोबुद्धिः, मुनिः, मोक्षपरायणः, विगतेच्छाभयक्रोधः, यः, सदा, मुक्तः, एव, सः ॥२८॥

यतेन्द्रियमनोबुद्धिः = जीती हुई हैं इन्द्रियां मन और बुद्धि जिसकी ऐसा
यः = जो
मोक्षपरायणः = मोक्षपरायण
मुनिः = मुनि*

* परमेश्वरके स्वरूपका निरन्तर मनन करनेवाला ।

विगतेच्छा-भयक्रोधः	= इच्छा भय और क्रोधसे रहित है	सदा	= सदा
		मुक्तः	= मुक्त
सः	= वह	एव	= ही है

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ २९ ॥

प्रभावसहित परमेश्वर को जाननेसे शान्ति-की प्राप्ति ।

भोक्तारम्, यज्ञतपसाम्, सर्वलोकमहेश्वरम्, सुहृदम्, सर्वभूतानाम्, ज्ञात्वा, माम्, शान्तिम्, ऋच्छति ॥ २९ ॥

और हे अर्जुन ! मेरा भक्त—

माम्	= मेरेको	सर्व-भूतानाम्	= संपूर्ण भूत-प्राणियोंका
यज्ञतपसाम्	= यज्ञ और तपोंका	सुहृदम्	= सुहृद् अर्थात् स्वार्थरहित प्रेमी
भोक्तारम्	= भोगनेवाला		(ऐसा)
	(और)	ज्ञात्वा	= तत्त्वसे जानकर
सर्वलोक-महेश्वरम्	= संपूर्ण लोकोंके ईश्वरोंका भी ईश्वर	शान्तिम्	= शान्तिको
	(तथा)	ऋच्छति	= प्राप्त होता है

और सच्चिदानन्दघन परिपूर्ण शान्त ब्रह्मके सिवाय उसकी दृष्टिमें और कुछ भी नहीं रहता केवल वासुदेव ही वासुदेव रह जाता है ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयोगो नाम पञ्चमोऽध्यायः ॥ ५ ॥

ॐ श्रीपरमात्मने नमः

अथ षष्ठोऽध्यायः

प्रधान विषय—१ से ४ तक निष्काम कर्मयोगका विषय और योगारूढ़ पुरुषके लक्षण, (५—१०) आत्म-उद्धारके लिये प्रेरणा और भगवत्-प्राप्तिवाले पुरुषके लक्षण, (११—३२) विस्तारसे ध्यानयोगका विषय, (३३—३६) मनके निग्रहका विषय, (३७—४७) योगभ्रष्ट पुरुषकी गतिका विषय और ध्यानयोगीकी महिमा ।

श्रीभगवानुवाच

निष्काम कर्मयोगीकी प्रशंसा

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥१॥

अनाश्रितः, कर्मफलम्, कार्यम्, कर्म, करोति, यः,
सः, संन्यासी, च, योगी, च, न, निरग्निः, न, च, अक्रियः ॥१॥

उसके उपरान्त श्रीकृष्णमहाराज बोले हे अर्जुन-

यः	=जो पुरुष	च	=और (केवल)
कर्मफलम्	=कर्मके फलको	निरग्निः	=अग्निको त्यागनेवाला (संन्यासी योगी)
अनाश्रितः	=न चाहता हुआ	न	=नहीं है
कार्यम्	=करने योग्य	च	=तथा (केवल)
कर्म	=कर्म	अक्रियः	=क्रियाओंको त्यागनेवाला (भी संन्यासी योगी)
करोति	=करता है	न	=नहीं है
सः	=वह		
संन्यासी	=संन्यासी		
च	=और		
योगी	=योगी है		

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥२॥

संन्यास और निष्कामकर्मयोग की एकता।

यम्, संन्यासम्, इति, प्राहुः, योगम्, तम्, विद्धि, पाण्डव,
न, हि, असंन्यस्तसंकल्पः, योगी, भवति, कश्चन ॥२॥

इसलिये—

पाण्डव	=हे अर्जुन	हि	=क्योंकि
यम्	=जिसको	असंन्यस्त-संकल्पः	=संकल्पोंको न त्यागनेवाला
संन्यासम्	=संन्यास*		
इति	=ऐसा	कश्चन	=कोई भी पुरुष
प्राहुः	=कहते हैं	योगी	=योगी
तम्	=उसीको (तूं)	न	=नहीं
योगम्	=योग †		
विद्धि	=जान	भवति	=होता

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥३॥

मुमुक्षुके लिये कल्याणके उपाय का कथन।

आरुरुक्षोः, मुनेः, योगम्, कर्म, कारणम्, उच्यते,
योगारूढस्य, तस्य, एव, शमः, कारणम्, उच्यते ॥३॥

और—

योगम्	=समत्वबुद्धि-रूप योगमें	मुनेः	=मननशील पुरुषके लिये
आरुरुक्षोः	=आरूढ होनेकी इच्छावाले		(योगकी प्राप्तिमें)

*-†गीता अ० २ श्लोक ३ की टिप्पणीमें इसका खुलासा अर्थ लिखा है।

कर्म = निष्कामभावसे कर्म करना ही
कारणम् = हेतु
उच्यते = कहा है
(और योगारूढ़ हो जानेपर)
तस्य = उस
योगारूढस्य = योगारूढ़ पुरुषके लिये
शमः = सर्वसंकल्पोंका अभाव
एव = ही (कल्याणमें)
कारणम् = हेतु
उच्यते = कहा है

योगारूढ़ पुरुष के लक्षण।

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥४॥

यदा, हि, न, इन्द्रियार्थेषु, न, कर्मसु, अनुषज्जते, सर्वसंकल्पसंन्यासी, योगारूढः, तदा, उच्यते ॥ ४ ॥

और—

यदा = जिस कालमें
न = न (तो)
इन्द्रियार्थेषु = इन्द्रियोंके भोगोंमें
(अनुषज्जते) = आसक्त होता है
(तथा)
न = न
कर्मसु = कर्मोंमें
हि = ही
अनुषज्जते = आसक्त होता है
तदा = उस कालमें
सर्वसंकल्पसंन्यासी = सर्वसंकल्पोंका त्यागी पुरुष
योगारूढः = योगारूढ़
उच्यते = कहा जाता है

अपना उद्धार करनेके लिये प्रेरणा।

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥५॥

उद्धरेत्, आत्मना, आत्मानम्, न, आत्मानम्, अवसादयेत्, आत्मा, एव, हि, आत्मनः, बन्धुः, आत्मा, एव, रिपुः, आत्मनः ॥५॥

और यह योगारूढ़ता कल्याणमें हेतु कही है इसलिये मनुष्यको चाहिये कि

आत्मना	=अपने द्वारा	हि	=क्योंकि (यह)
आत्मानम्	=आपका (संसारसमुद्रसे)	आत्मा	=जीवात्मा आप
		एव	=ही (तो)
उद्धरेत्	=उद्धार करे (और)	आत्मनः	=अपना
		बन्धुः	=मित्र है (और)
आत्मानम्	=अपने आत्माको	आत्मा	=आप
		एव	=ही
न अवसादयेत्	=अधोगतिमें न पहुंचावे	आत्मनः	=अपना
		रिपुः	=शत्रु है

अर्थात् और कोई दूसरा शत्रु या मित्र नहीं है।

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः। [„]
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥६॥

बन्धुः, आत्मा, आत्मनः, तस्य, येन, आत्मा, एव, आत्मना, जितः, अनात्मनः, तु, शत्रुत्वे, वर्तेत, आत्मा, एव, शत्रुवत् ॥६॥

तस्य	=उस	जितः	=जीता हुआ है
आत्मनः	=जीवात्माका तो (वह)	तु	=और
आत्मा	=आप	अनात्मनः	=जिसके द्वारा मन और इन्द्रियोंसहित शरीर नहीं जीता गया है उसका (वह)
एव	=ही		
बन्धुः	=मित्र है (कि)		
येन	=जिस		
आत्मना	=जीवात्माद्वारा		
आत्मा	=मन और इन्द्रियों-सहित शरीर	आत्मा	=आप

एव	= ही	शत्रुत्वे	= शत्रुतामें
शत्रुवत्	= शत्रुके सदृश	वर्तेत	= वर्तता है

परमात्माको प्राप्त हुए योगीके लक्षण ।

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥७॥

जितात्मनः, प्रशान्तस्य, परमात्मा, समाहितः,
शीतोष्णसुखदुःखेषु, तथा, मानापमानयोः ॥ ७ ॥

और हे अर्जुन—

शीतोष्ण-सुखदुःखेषु	= सर्दी गर्मी और सुख-दुःखादिकोंमें	जितात्मनः	= स्वाधीन आत्मावाले पुरुषके (ज्ञानमें)
तथा	= तथा		
मानाप-मानयोः	= मान और अपमानमें	परमात्मा	= सच्चिदानन्द-घन परमात्मा
प्रशान्तस्य	= जिसके अन्तः-करणकी वृत्तियां अच्छी प्रकार शान्त हैं अर्थात् विकार-रहित हैं (ऐसे)	समाहितः	= सम्यक् प्रकारसे स्थित हैं अर्थात् उसके ज्ञानमें परमात्माके सिवाय अन्य कुछ है ही नहीं

[„] **ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।**
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥

ज्ञानविज्ञानतृप्तात्मा, कूटस्थः, विजितेन्द्रियः,
युक्तः, इति, उच्यते, योगी, समलोष्टाश्मकाञ्चनः ॥ ८ ॥

और—

ज्ञान-विज्ञान-तृप्तात्मा = {ज्ञान विज्ञानसे तृप्त है अन्तः-करण जिसका
(तथा)
कूटस्थः = {विकाररहित है स्थिति जिसकी
(और)
विजितेन्द्रियः = {अच्छी प्रकार जीती हुई हैं इन्द्रियां जिसकी
(तथा)
समलोष्टाश्म-काञ्चनः = {समान है मिट्टी पत्थर और सुवर्ण जिसके (वह)
योगी = योगी
युक्तः = {युक्त अर्थात् भगवत्की प्राप्तिवाला है
इति = ऐसे
उच्यते = कहा जाता है

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥९॥

सबमें समबुद्धि-वाले योगीकी प्रशंसा ।

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु,
साधुषु, अपि, च, पापेषु, समबुद्धिः, विशिष्यते ॥ ९ ॥

और जो पुरुष—

सुहृद् = सुहृद्*
मित्र = मित्र
अरि = बैरी
उदासीन = उदासीन†
मध्यस्थ = मध्यस्थ‡
द्वेष्य = द्वेषी (और)
बन्धुषु = बन्धुगणोंमें
(तथा)
साधुषु = धर्मात्माओंमें
च = और
पापेषु = पापियोंमें
अपि = भी
समबुद्धिः = {समान भाव-वाला है

* स्वार्थरहित सबका हित करनेवाला । † पक्षपातरहित ।
‡ दोनों ओरकी भलाई चाहनेवाला ।

(वह)	विशिष्यते = अति श्रेष्ठ है

ध्यानयोगका साधन करनेके लिये प्ररणा।

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥१०॥

योगी, युञ्जीत, सततम्, आत्मानम्, रहसि, स्थितः,
एकाकी, यतचित्तात्मा, निराशीः, अपरिग्रहः ॥१०॥

इसलिये उचित है कि—

यतचित्तात्मा = जिसका मन और इन्द्रियोंसहित शरीर जीता हुआ है ऐसा	एकाकी = अकेला ही
	रहसि = एकान्त स्थानमें
	स्थितः = स्थित हुआ
	सततम् = निरन्तर
निराशीः = वासनारहित (और)	आत्मानम् = आत्माको
अपरिग्रहः = संग्रहरहित	युञ्जीत = (परमेश्वरके ध्यानमें) लगावे
योगी = योगी	

ध्यानयोगके लिये आसन-स्थापनकी विधि।

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ।११।

शुचौ, देशे, प्रतिष्ठाप्य, स्थिरम्, आसनम्, आत्मनः,
न, अत्युच्छ्रितम्, न, अतिनीचम्, चैलाजिनकुशोत्तरम् ।११।

कैसे कि—

शुचौ = शुद्ध	आत्मनः = अपने
देशे = भूमिमें	आसनम् = आसनको
चैलाजिनकुशोत्तरम् = कुशा मृगछाला और वस्त्र हैं उपरोपरि जिसके ऐसे	न = न
	अत्युच्छ्रितम् = अति ऊंचा (और)
	न = न

अतिनीचम् = अति नीचा
स्थिरम् = स्थिर
प्रतिष्ठाप्य = स्थापन करके

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥१२॥

आसनपर बैठकर योग का साधन करनेके लिये कथन।

तत्र, एकाग्रम्, मनः, कृत्वा, यतचित्तेन्द्रियक्रियः,
उपविश्य, आसने, युञ्ज्यात्, योगम्, आत्मविशुद्धये ॥१२॥

और—

तत्र = उस
आसने = आसनपर
उपविश्य = बैठकर
(तथा)
मनः = मनको
एकाग्रम् = एकाग्र
कृत्वा = करके
यतचित्तेन्द्रियक्रियः = चित्त और इन्द्रियोंकी क्रियाओंको वशमें किया हुआ
आत्मविशुद्धये = अन्तःकरणकी शुद्धिके लिये
योगम् = योगका
युञ्ज्यात् = अभ्यास करे

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥१३॥

ध्यानयोगकी विधि।

समम्, कायशिरोग्रीवम्, धारयन्, अचलम्, स्थिरः,
संप्रेक्ष्य, नासिकाग्रम्, स्वम्, दिशः, च, अनवलोकयन् ॥१३॥

उसकी विधि इस प्रकार है कि—

कायशिरोग्रीवम् = काया शिर और ग्रीवाको
समम् = समान
च = और
अचलम् = अचल
धारयन् = धारण किये हुए
स्थिरः = दृढ़
(होकर)

स्वम्	= अपने	दिशः	= अन्य दिशाओंको
नासिकाग्रम्	= नासिकाके अग्रभागको	अनवलोकयन्	= न देखता हुआ
संप्रेक्ष्य	= देखकर		

[„] प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥१४॥

प्रशान्तात्मा, विगतभीः, ब्रह्मचारिव्रते, स्थितः,
मनः, संयम्य, मच्चित्तः, युक्तः, आसीत, मत्परः ॥१४॥

और–

ब्रह्मचारिव्रते	= ब्रह्मचर्यके व्रतमें	युक्तः	= सावधान (होकर)
स्थितः	= स्थित रहता हुआ	मनः	= मनको
विगतभीः	= भयरहित (तथा)	संयम्य	= वशमें करके
प्रशान्तात्मा	= अच्छी प्रकार शान्त अन्तः-करणवाला (और)	मच्चित्तः	= मेरेमें लगे हुए चित्तवाला (और)
		मत्परः	= मेरे परायण हुआ
		आसीत	= स्थित होवे

ध्यानयोगका फल। युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥१५॥

युञ्जन्, एवम्, सदा, आत्मानम्, योगी, नियतमानसः,
शान्तिम्, निर्वाणपरमाम्, मत्संस्थाम्, अधिगच्छति ॥१५॥

एवम्	= इस प्रकार	आत्मानम्	= आत्माको

सदा = निरन्तर
युञ्जन् = (परमेश्वरके स्वरूपमें) लगाता हुआ
नियत-मानसः = स्वाधीन मन-वाला
योगी = योगी
मत्संस्थाम् = मेरेमें स्थिति-रूप
निर्वाण-परमाम् = परमानन्द पराकाष्ठा-वाली
शान्तिम् = शान्तिको
अधिगच्छति = प्राप्त होता है

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥१६॥

अनियमित भोजनादि करने-वालेको योगकी अप्राप्ति।

न, अति, अश्नतः, तु, योगः, अस्ति, न, च, एकान्तम्, अनश्नतः,
न, च, अति, स्वप्नशीलस्य, जाग्रतः, न, एव, च, अर्जुन ॥१६॥

परन्तु—

अर्जुन = हे अर्जुन
योगः = यह योग
न = न
तु = तो
अति = बहुत
अश्नतः = खानेवालेका
अस्ति = सिद्ध होता है
च = और
न = न
एकान्तम् = बिल्कुल
अनश्नतः = न खानेवालेका
च = तथा
न = न
अति = अति
स्वप्न-शीलस्य = शयन करनेके स्वभाववालेका
च = और
न = न
जाग्रतः = अत्यन्त जागनेवालेका
एव = ही
(सिद्ध होता है)

नियमित आहार विहार आदि करने वालेको योगकी प्राप्ति।

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥१७॥

युक्ताहारविहारस्य, युक्तचेष्टस्य, कर्मसु,
युक्तस्वप्नावबोधस्य, योगः, भवति, दुःखहा ॥ १७ ॥

यह–

दुःखहा	= दुःखोंका नाश करनेवाला	युक्तचेष्टस्य	= यथायोग्य चेष्टा करनेवालेका (और)
योगः	= योग (तो)	युक्तस्वप्नावबोधस्य	= यथायोग्य शयन करने तथा जागनेवालेका (ही) (सिद्ध)
युक्ताहारविहारस्य	= यथायोग्य आहार और विहार करनेवालेका (तथा)	भवति	= होता है
कर्मसु	= कर्मोंमें		

योगयुक्त पुरुषका लक्षण।

यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा॥१८॥

यदा, विनियतम्, चित्तम्, आत्मनि, एव, अवतिष्ठते,
निःस्पृहः, सर्वकामेभ्यः, युक्तः, इति, उच्यते, तदा ॥१८॥

इस प्रकार योगके अभ्याससे–

विनियतम्	= अत्यन्त वशमें किया हुआ	एव	= ही
चित्तम्	= चित्त	अवतिष्ठते	= भली प्रकार स्थित हो जाता है
यदा	= जिस कालमें		
आत्मनि	= परमात्मामें	तदा	= उस कालमें

सर्वकामेभ्यः	= संपूर्ण कामनाओंसे	युक्तः	= योगयुक्त
निःस्पृहः	= स्पृहारहित हुआ पुरुष	इति	= ऐसा
		उच्यते	= कहा जाता है

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥१९॥

दीपकके दृष्टान्तसे योगीके चित्त की उपमा ।

यथा, दीपः, निवातस्थः, न, इङ्गते, सा, उपमा, स्मृता, योगिनः, यतचित्तस्य, युञ्जतः, योगम्, आत्मनः ॥१९॥

और—

यथा	= जिस प्रकार	उपमा	= उपमा
निवातस्थः	= वायुरहित स्थानमें स्थित	आत्मनः	= परमात्माके
दीपः	= दीपक	योगम् युञ्जतः	= ध्यानमें लगे हुए
न	= नहीं	योगिनः	= योगीके
इङ्गते	= चलायमान होता है	यतचित्तस्य	= जीते हुए चित्तकी
सा	= वैसी ही	स्मृता	= कही गयी है

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति॥२०॥

ध्यानयोग की परिपक्व अवस्थाके लक्षण और ध्यानयोगी के आनन्द की महिमा ।

यत्र, उपरमते, चित्तम्, निरुद्धम्, योगसेवया, यत्र, च, एव, आत्मना, आत्मानम्, पश्यन्, आत्मनि, तुष्यति॥

और हे अर्जुन—

यत्र	= जिस अवस्थामें	निरुद्धम्	= निरुद्ध हुआ
योगसेवया	= योगके अभ्याससे	चित्तम्	= चित्त
		उपरमते	= उपराम हो जाता है

च = और	पश्यन् = साक्षात् करता हुआ
यत्र = जिस अवस्थामें (परमेश्वरके ध्यानसे)	आत्मनि = सच्चिदानन्द-घन परमात्मामें
आत्मना = शुद्ध हुई सूक्ष्म बुद्धिद्वारा	एव = ही
आत्मानम् = परमात्माको	तुष्यति = संतुष्ट होता है

[„] सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः॥२१॥

सुखम्, आत्यन्तिकम्, यत्, तत्, बुद्धिग्राह्यम्, अतीन्द्रियम्, वेत्ति, यत्र, न, च, एव, अयम्, स्थितः, चलति, तत्त्वतः ॥२१॥

तथा—

अतीन्द्रियम् = इन्द्रियोंसे अतीत	तत् = उसको
बुद्धिग्राह्यम् = केवल शुद्ध हुई सूक्ष्म बुद्धिद्वारा ग्रहण करने योग्य	यत्र = जिस अवस्थामें
	वेत्ति = अनुभव करता है
	च = और
	(यत्र) = जिस अवस्थामें
	स्थितः = स्थित हुआ
	अयम् = यह योगी
यत् = जो	तत्त्वतः = भगवत्स्वरूपसे
आत्यन्तिकम् = अनन्त	न एव = नहीं
सुखम् = आनन्द है	चलति = चलायमान होता है

[„] यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥

यम्, लब्ध्वा, च, अपरम्, लाभम्, मन्यते, न, अधिकम्, ततः, यस्मिन्, स्थितः, न, दुःखेन, गुरुणा, अपि, विचाल्यते ॥२२॥

और—

यम्	= (परमेश्वरकी प्राप्तिरूप) जिस लाभको	च	= और
लब्ध्वा	= प्राप्त होकर	यस्मिन्	= (भगवत्-प्राप्ति-रूप) जिस अवस्थामें
ततः	= उससे	स्थितः	= स्थित हुआ योगी
अधिकम्	= अधिक	गुरुणा	= बड़े भारी
अपरम्	= दूसरा (कुछ भी)	दुःखेन	= दुःखसे
लाभम्	= लाभ	अपि	= भी
न	= नहीं	न विचाल्यते	= चलायमान नहीं होता है
मन्यते	= मानता है		

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा॥२३॥

तत्पर होकर ध्यानयोग करनेके लिये कथन।

तम्, विद्यात्, दुःखसंयोगवियोगम्, योगसंज्ञितम्,
सः, निश्चयेन, योक्तव्यः, योगः, अनिर्विण्णचेतसा॥२३॥

और जो—

दुःख-संयोग-वियोगम्	= दुःखरूप संसार-के संयोगसे रहित है (तथा)	सः	= वह
योग-संज्ञितम्	= जिसका नाम योग है	योगः	= योग
तम्	= उसको	अनिर्विण्ण-चेतसा	= न उकताये हुए चित्तसे अर्थात् तत्परहुएचित्तसे
विद्यात्	= जानना चाहिये	निश्चयेन	= निश्चयपूर्वक
		योक्तव्यः	= करना कर्तव्य है

अचिन्त्यस्वरूप परमात्मा के ध्यानकी विधि।

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥२४॥

संकल्पप्रभवान्, कामान्, त्यक्त्वा, सर्वान्, अशेषतः, मनसा, एव, इन्द्रियग्रामम्, विनियम्य, समन्ततः ॥२४॥

इसलिये मनुष्यको चाहिये कि—

संकल्पप्रभवान् = संकल्पसे उत्पन्न होनेवाली	(और)
सर्वान् = संपूर्ण	**मनसा** = मनके द्वारा
कामान् = कामनाओंको	**इन्द्रियग्रामम्** = इन्द्रियोंके समुदायको
अशेषतः = निःशेषतासे अर्थात् वासना और आसक्तिसहित	**समन्ततः** = सब ओरसे
	एव = ही
त्यक्त्वा = त्यागकर	**विनियम्य** = अच्छी प्रकार वशमें करके

[„] **शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया।**
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥

शनैः, शनैः, उपरमेत्, बुद्ध्या, धृतिगृहीतया, आत्मसंस्थम्, मनः, कृत्वा, न, किंचित्, अपि, चिन्तयेत् ॥२५॥

शनैः शनैः = क्रम क्रमसे (अभ्यास करता हुआ)	**धृतिगृहीतया** = धैर्ययुक्त
	बुद्ध्या = बुद्धिद्वारा
उपरमेत् = उपरामताको प्राप्त होवे (तथा)	**मनः** = मनको
	आत्मसंस्थम् = परमात्मामें स्थित

कृत्वा	=करके (परमात्माके सिवाय और)	किंचित्	=कुछ
		अपि	=भी
		न चिन्तयेत्	=चिन्तन न करे

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥२६॥

मनको परमात्मा में लगानेका उपाय ।

यतः, यतः, निश्चरति, मनः, चञ्चलम्, अस्थिरम्,
ततः, ततः, नियम्य, एतत्, आत्मनि, एव, वशम्, नयेत् ॥२६॥

परन्तु जिसका मन वशमें नहीं हुआ हो उसको चाहिये कि—

एतत्	=यह	ततः	=उस
अस्थिरम्	={स्थिर न रहनेवाला (और)	ततः	=उससे
चञ्चलम्	=चञ्चल	नियम्य	=रोककर (वारम्वार)
मनः	=मन	आत्मनि	=परमात्मामें
यतः यतः	={जिस जिस कारणसे	एव	=ही
निश्चरति	={सांसारिक पदार्थोंमें विचरता है	वशम्	=निरोध
		नयेत्	=करे

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥२७॥

ध्यानयोगसे उत्तम और अत्यन्त सुखकी प्राप्ति ।

प्रशान्तमनसम्, हि, एनम्, योगिनम्, सुखम्, उत्तमम्,
उपैति, शान्तरजसम्, ब्रह्मभूतम्, अकल्मषम् ॥२७॥

हि	=क्योंकि		
प्रशान्तमनसम्	={जिसका मन अच्छी प्रकार शान्त है (और)	अकल्मषम्	={जो पापसे रहित है (और)

शान्त-रजसम्	= जिसका रजोगुण शान्त हो गया है ऐसे	योगिनम्	= योगीको
एनम्	= इस	उत्तमम्	= अति उत्तम
ब्रह्म-भूतम्	= सच्चिदानन्दघन ब्रह्मके साथ एकीभाव हुए	सुखम्	= आनन्द
		उपैति	= प्राप्त होता है

[„] **युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।**
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥२८॥

युञ्जन्, एवम्, सदा, आत्मानम्, योगी, विगतकल्मषः,
सुखेन, ब्रह्मसंस्पर्शम्, अत्यन्तम्, सुखम्, अश्नुते ॥२८॥

और वह—

विगतकल्मषः	= पापरहित	सुखेन	= सुखपूर्वक
योगी	= योगी	ब्रह्म-संस्पर्शम्	= परब्रह्म परमात्माकी प्राप्तिरूप
एवम्	= इस प्रकार		
सदा	= निरन्तर	अत्यन्तम्	= अनन्त
आत्मानम्	= आत्माको	सुखम्	= आनन्दको
युञ्जन्	= (परमात्मामें) लगाता हुआ	अश्नुते	= अनुभव करता है

सर्वत्र आत्म-दर्शनका कथन। **सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।**
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥२९॥

सर्वभूतस्थम्, आत्मानम्, सर्वभूतानि, च, आत्मनि,
ईक्षते, योगयुक्तात्मा, सर्वत्र, समदर्शनः ॥२९॥

और हे अर्जुन—

योग-युक्तात्मा	= सर्वव्यापी अनन्त चेतनमें एकीभावसे स्थितिरूप योगसे युक्त हुए आत्मावाला (तथा)	आत्मानम्	= आत्माको
		सर्वभूतस्थम्	= संपूर्ण भूतोंमें बर्फमें जलके सदृश व्यापक (देखता है)
		च	= और
सर्वत्र	= सबमें	सर्वभूतानि	= संपूर्ण भूतोंको
समदर्शनः	= समभावसे देखनेवाला योगी	आत्मनि	= आत्मामें
		ईक्षते	= देखता है

अर्थात् जैसे स्वप्नसे जगा हुआ पुरुष स्वप्नके संसारका अपने अन्तर्गत संकल्पके आधार देखता है वैसे ही वह पुरुष संपूर्ण भूतोंको अपने सर्वव्यापी अनन्त चेतन आत्माके अन्तर्गत संकल्पके आधार देखता है।

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥३०॥

सर्वत्र परमात्म-दर्शनका फल।

यः, माम्, पश्यति, सर्वत्र, सर्वम्, च, मयि, पश्यति, तस्य, अहम्, न, प्रणश्यामि, सः, च, मे, न, प्रणश्यति ॥३०॥

और—

यः	= जो पुरुष	पश्यति	= देखता है
